National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(59): 234-236
© 2025 NJHSR
www.sanskritarticle.com

**श्रीजेषु टि**
अनुसन्धाता (ज्योतिषविभागः),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**श्रीजेषु टि**
अनुसन्धाता (ज्योतिषविभागः),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# सामाजिकसन्तुलनाय ग्रहाणां शुभाशुभफलानां भूमिका

**श्रीजेषु टि**

**शोधसारः**

ज्योतिषशास्त्रे शुभाशुभत्वेन ग्रहाणां विभागः कृतः वर्तते। बुधः, शुक्रः, बृहस्पतिः चन्द्रश्च शुभग्रहाः तथा शनिः, मङ्गलः, राहुः, केतुः रविः च दुष्टग्रहाः इत्यपि ज्ञेयः। परन्तु ग्रहस्थानानुसारं ग्रहाणां शुभपापत्वे परिवर्तनं भविष्यति। शनिः कतिपयेषु ग्रहस्थानेषु, कतिपयेषु लग्नेषु लाभप्रदायकः भवति। एवमेव बृहस्पतिः केषाञ्चनलग्नेषु अशुभफलं प्रददाति। कुत्रचित् मंगलः शुभः, कुत्रचित् शुक्रः अशुभः च भवति। अतः व्यक्तीनां ग्रहस्थितेरनुसारेण ग्रहाणां शुभत्वाशुभत्वं निर्धारयितुं शक्यते। तदनुसारं परिणामाः भिन्नतया भविष्यन्ति। व्यक्तेः स्वभावरूपीकरणे ग्रहाणां प्रभावः महान् वर्तते इति ज्योतिषशास्त्रस्य अभिमतम्। एवमेव एकैकस्य ग्रहस्य विविधभावस्थितौ गुणदोषफलानि प्रतिफलति। मानवः सामाजिकजीविः इत्यनेन एते गुणदोषादयः समाजे प्रभावयति। विविधभावस्थितानां ग्रहाणां गुणदोषफलानि मानवं कथं प्रभावयतीति प्रतिपाद्यते पत्रेऽस्मिन्।

**कूटशब्दाः –** शुभग्रहाः, अशुभग्रहाः, सामाजिकसन्तुलनम्, छायाग्रहः, पञ्चताराग्रहाः।

**उपोद्घातः**

मानवानां समूहः एव समाजः इति कथ्यते। मानवानां स्वभावाश्रितो भवति स च समाजः। यस्मिन् समाजे सच्चिन्ता, आध्यात्मिकभावना, सदाचारादि भावनायुक्तमानवाः भवन्ति स च समाजः उत्तमसमाजत्वेन मन्यते। यत्र वृथा कलहः, निद्रा, व्यसनं, दुराचाराः कुमानसिकता इत्यादिभिः दुर्गुणैः युक्ताः जनाः भवन्ति सः च समाजः कुसमाजः इति कथ्यते। धर्मः, ज्ञानम्, विद्यादयः पशुपक्षिभिः मानवं पृथक्करोति।

शास्त्रे उक्तं वर्तते यत्-

**आहारनिद्राभयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषः धर्मेण हीनाः पशुभिः समानाः॥**

परन्तु मानवः बुद्धेः उत्कर्षेण सामाजिकपरिष्करणं कुर्वन्तः सन्ति। अतः मनुजः समाजमुपजीव्यैव जीवति। सामाजिकस्य मानवस्य वैयक्तिकपरिपोषणमपि आवश्यकमेव। यतः व्यक्तयः एव समाजं सृजन्ति। व्यक्तिगुणाः एव उत्तमसमाजस्याधारः। मानवजीवने सामाजिकपरिवर्तने च ज्योतिषशास्त्रस्य महद्योगदानं वर्तते इति ज्योतिषज्ञानामभिमतम्। तत्रैव ग्रहाणां स्थितिः चलनाद्यनुगुणं मानवजीवने समाजे च परिवर्तनानि आयान्ति।

**ग्रहाणां शुभाशुभत्वम्**

सर्वेषां ग्रहाणां सामान्यतया शुभाशुभफलानि भवन्ति। तेषां स्थानान्तरानुगुणं फलसिद्धिः भवति। प्रायः केचन ग्रहाः ज्योतिषशास्त्रे शुभग्रहाः तथा च अशुभग्रहाः इत्येवं ज्ञायन्ते। मंगलः, बुधः, बृहस्पतिः, शुक्रः, शनिश्च पञ्चताराग्रहाः इति कथ्यन्ते। सूर्यचन्द्रौ च प्रकाशग्रहौ राहुकेतवः कृष्णग्रहौ इत्यपि ज्ञेयः।

कृष्णग्रहाः छायाग्रहाश्च इत्यपि अभिज्ञायते। नवानां ग्रहाणामपि उपग्रहाः सन्ति। गुलिकः शनेः उपग्रहः वर्तते। एवमेव बुधस्य अर्धप्रहारः, बृहस्पतेः यमघण्डश्च वर्तते उपग्रहाः। तेषु प्रसिद्धतमः गुलिकः। केषाञ्चनदृष्टौ कुख्यातः अयम् उग्रमूर्तिः पूर्णनिग्रहा-नुग्रहशक्तिमान् च वर्तते। केरलीयज्योतिश्शास्त्रस्य शक्तिकेन्द्रेषु अन्यतमः अयं गुलिकः इति विद्वद्भिः निःसन्देहं अभिप्रैति। मन्दः इति शनेः अपरं नाम। गुलिकः मण्डनस्य पुत्रः इति सङ्कल्पः। अतः एव 'मान्दी' इत्यपि कथ्यते। ग्रहस्थानेषु 'मा' इत्यक्षरं गुरुं सूचयति।

शुभग्रहाः अशुभग्रहाश्चेत्येवं ग्रहाणां विभागः ज्योतिषशास्त्रे प्रबलः वर्तते। बुधः, शुक्रः, बृहस्पतिः चन्द्रश्च शुभग्रहाः इति प्रथितः। शनिः, मङ्गलः, राहुः, केतुः रविः च दुष्टग्रहा इत्यपि। किन्तु अयं विचारः कदाचित् सापेक्षमपि भवति। ग्रहस्थानानुसारं ग्रहाणां शुभपापत्वे परिवर्तनं भविष्यति। शनिः कतिपयेषु ग्रहस्थानेषु, कतिपयेषु लग्नेषु लाभप्रदायकः भवति। एवमेव बृहस्पतिः केषाञ्चनलग्नेषु अशुभफलं प्रददाति। कुत्रचित् मंगलः शुभः, कुत्रचित् शुक्रः अशुभः च भवति। अतः व्यक्तिनां ग्रहस्थितेरनुसारेण ग्रहाणां शुभत्वाशुभत्वं निर्धारयितुं शक्यते। तदनुसारं परिणामाः भिन्नतया भविष्यन्ति।

शुभग्रहाणाम् अशुभग्रहाणां परामर्शः क्रियते –

**क्षीणेन्द्वर्ककुजाहिकेतुरविजाः पापाः सपापाश्च वित्।**[1]

अर्थात् क्षीणचन्द्रः रविः कुजः, अहिर्नाम राहुः, केतुः, शनिः, पापयुक्तः बुधश्चेति पापग्रहाः।

**क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापाः बुधस्तैर्युतः।**[2]

अत्र क्षीणचन्द्रः, रविः, कुजः, शनिः, पापयुक्तः बुधः इत्यादयाः पापग्रहाः इति ज्ञायते।

एकस्य व्यक्तेः स्वभावरूपीकरणे ग्रहाणां प्रभावः महती वर्तते। एवमेव एकैकस्य ग्रहस्य विविधभावस्थितौ गुणदोषफलानि प्रतिफलति। मानवः सामाजिकजीविः इत्यनेन एते गुणदोषादयः समाजे प्रभावयति। विविधभावस्थितानां ग्रहाणां गुणदोषफलानि मानवं कथं प्रभावयतीति प्रतिपाद्यते-

**शूरस्तब्धो विकलनयनो निर्घृणोऽर्के तनुस्थे,**
**मेषे सस्वस्तिमिरनयनः, सिंहसंस्थे निशान्धः**
**नीचेन्धोऽ स्वः, शशिगृहगते बुद्‌बुदाक्षः पतङ्गे,**
**भूरिद्रव्यो नृपहृतधनो वक्त्ररोगी द्वितीये॥**[3]

मेषः, कर्काटकः, तुला, सिंहेत्यादयः अतिरिच्य अन्याः राशयः लग्नत्वेन, तेषु सूर्यस्थितौ च युद्धप्रियः, अन्यान् जनान् परीहसितुं कुशलः, नेत्ररोगी, निर्दयश्च भवति। मेषे मेषलग्ने वा सूर्यस्थितौ धनिकः, सिंहे च रात्र्यन्धः, तुलायां अन्धः दरिद्रश्चेदि फलानि। कर्काटके सूर्यश्चेत् नेत्ररोगी च भवति इति प्रमाणम्।

**मतिविक्रमवांस्त्रितीयगेऽर्के,**
**विसुखः पीडितमानसश्चतुर्थे;**
**असुतो धनवर्ज्जितस्त्रिकोणे,**
**बलवान् शत्रुजितश्च शत्रुयाते॥**[4]

तृतीयभावे सूर्यश्चेत् सुबुद्धि भवति जातकः। चतुर्थे चेत् सुखरहितः सदा दुःखी च भवति। पञ्चमे तु सन्तानोत्पत्तेर्परं सन्ताननाशः दारिद्रता च फलम्। लग्ने षष्ठमे सूर्यस्थितौ जितशत्रवः बलवान् च भवति। अत्र सूर्यस्य बलवतासत्येव शत्रोः उपरि विजयम् भवति।

**स्त्रीभिर्ग्गतः पारिभवं मदगे पतङ्गे,**
**स्वल्पात्मजो निधनगे विकलेक्षणश्च;**
**धर्म्मे सुतार्त्थसुखभाक्, श्रुतशौर्यभाक् खे**
**लाभे प्रभूतधनवान्, पतितस्तु रिःफे॥**[5]

लग्नात् सप्तमे सूर्यस्थितौ भार्यादिस्त्रीजनानाम् अपमानं करोति। अष्टमे तु सन्तानन्यूनता, नेत्ररोगी, अन्धः च भवति। नवमे चेत् पुत्रलब्धिः, सुखं, धनलाभश्च भवन्ति। दशमे चेत् अभ्यस्तशास्त्र-विशारदः च भवति। ऐकादशे धनसमृद्धिः द्वादशे कर्मभ्रष्टत्वम् इत्यादि बलत्वेन भवन्ति।

**मूकोन्मत्तजलान्धनीचबधिर प्रेष्याः शशाङ्कोधये,**
**स्वरअक्षाजोच्चगते धनी बहुसुतः,सस्व कुटुंबी धने**
**हिंस्रो भ्रातृगते, सुखे सतनये तत्प्रोक्तभावान्वितो,**
**नैकारिर्मृदुकायवह्निमदनस्तीक्ष्णोऽलसश्चारिके॥**[6]

मेष-वृषभ-कर्काटकश्च विहाय यदि चन्द्रः अन्येषु राशीषु आरोही भवति तर्हि एतेषु सप्तसु वाक् हीनता, मानसिकमोहः, ज्ञानाभावः, नेत्राभावः, दुष्कर्म, श्रवणाभावः, दासत्वं च अनुभविष्यते। यदि चन्द्रं कर्कराशिं प्राप्यते तर्हि धनिकः स्यात्, मेषराशिस्थः चेत् अनेकाः पुत्राः भविष्यन्ति, यदि चन्द्रः अष्टम्यां भवति तर्हि धनिकः भविष्यति। यदि चन्द्रः द्वितीयगृहे अस्ति तर्हि अनेके जनाः भविष्यन्ति साकम्, येषां अन्नं, वस्त्रम् इत्यादीनि ददाति। यदि चन्द्रः तृतीये भागे भवति तर्हि हिंसकः भविष्यति। यदि चन्द्रः चतुर्थे गृहे अस्ति तर्हि तस्य चतुर्थे गृहे यत् किमपि चिन्तनीयं तत् सर्वं भवन्ति यथा कृषिक्षेत्राणि, वाहनानि, बन्धुजनाः, माता, श्वश्रूः इत्यादयः। यदि पञ्चमे तिष्ठति तर्हि पञ्चमपक्षं पूर्वपुण्यम् इत्यादीनि चिन्तयितुं शक्नुवन् बुद्धिपुत्रः भविष्यति। षष्ठे चन्द्रः क्रूरः आलस्यः बहुशत्रुः जाराग्निकामे च दुर्बलः भविष्यति।

**ईर्ष्युस्त्रीप्रमदो मदे, बहुमतिर्व्याध्यर्द्दितश्चाष्टमे,**
**सौभाग्यात्मजमित्रबन्धुधनभाग् धर्म्मस्थिते शीतगौ**
**निष्पत्तिं समुपैति धर्म्मधनधी शौर्यैर्युतः कर्म्मगे,**
**ख्यातो भावगुणान्वितो भगवते, क्षुद्रोऽङ्गहीनो व्यये॥**[7]

यदि चन्द्रः लग्ननात् सप्तमे भवति तर्हि धैर्यं महत् गर्वं च न भविष्यति। अष्टमे स्थितं चेत् अतीवबुद्धिमान् रोगपीडितः भवेत्। नवमे यदि चन्द्रः तर्हि पुत्राः, मित्राणि च जायन्ते। बान्धवाः धनं च भविष्यति जातकस्य। यदि चन्द्रः दशमं स्थाप्यते तर्हि जातकः गुणवान्, धनवान्, बुद्धिमान्, शूरः च भवेत्। ऐकादशे चेत् सर्वेषु व्यापारेषु लाभः भविष्यति। विश्वप्रसिद्धा भविष्यति। लग्नात् चन्द्रः द्वादशभावे भवति चेत् सः व्यक्तिः कृपणः अङ्गविकलाङ्गः च भविष्यति।

**लग्ने कुजे क्षततनुर्द्धनगेकदन्नो,**
**धर्म्मेऽगवान्,दिनकरप्रतिमोऽन्यसंस्थः**
**विध्वान् धनी प्रबलपण्टितमन्त्यशत्रु-**
**नर्म्मज्ञविश्रुतगुणाः परतोऽर्कवत्, ज्ञे॥**[8]

उदयलग्ने कुजश्चेत् व्रणितशरीरः भवति। द्वितीये तु निन्दितान्नस्य भोगावस्था आयाति नवमे पापकर्मे कुशलः। शेषेषुभावेषु आदित्यस्य समानफलमनुभवेत्। लग्ने बुधस्य स्थानात् विदुषी, द्वितीये तु धनवान्, तृतीये तु प्रबलः, चतुर्थे तु प्रबलः, पञ्चमे तु राजमन्त्रिः षष्टमे तु शत्रुरहितः। सप्तमे नर्मज्ञः, अष्टमे तु अतिप्रसिद्धः गुणवान् च भवति। नवम-दशम- एकादशादिषु भावेषु बुधस्य स्थितौ तत्तत् स्थानेषु सूर्यस्य स्थितौ विद्यमानानि समानफलानि अनुभवेत्।

**विद्वान् सुवाक्यः कृपणः सुखी च**
**धीमानशत्रुः पितृतोऽतिकश्च।**
**नीचस्तपस्वी सधनः सलाभः**
**खलश्च जीवे क्रमशो विलग्नात्॥**[9]

बृहस्पतेः भावफलं सामान्यतया वक्ष्यते अत्र। बृहस्पतिः उदयलग्ने भवति चेत् सः जातकः विदुषी तथा द्वितीये चेत् सद्वाक्गुणोपेतः च भवति। चतुर्थे चेत् सुखी, पञ्चमे चेत् बुद्धिमान्, षष्ठमे चेत् शत्रुरहितः, सप्तमे चेत् पूर्विकानामपेक्षया उत्कृष्टः, नवमे चेत् तपस्वी, दशमे चेत् धनवान्, एकादशश्चेत् व्यापारकर्मसु लाभावान् इत्यादि शुभफलानि कांक्ष्यते। एवं बृहस्पतिः तृतीये चेत् स्वभावगुणविहीनः कारुण्यविहीनश्च भवति। अष्टमे चेत् नीचकर्मोत्सुकः, द्वादशे चेत् दुस्वभावकारणात् सद्सम्बन्धस्थापने विमुखः च भवति इत्येवं दोषफलानि भवन्ति इति प्रमाणम्।

**स्मरनिपुणः सुखितश्च विलग्ने**
**प्रियकलहोऽस्तगते सुरतेप्सुः**
**तनयगते सुखितो  भृगुपुत्रे**
**गुरुवदतोऽन्यगृहे सधनोऽन्त्ये॥**[10]

शुक्रस्य लग्नस्थितौ कामशास्त्रनिपुणः सुखी च भवति। सप्तमे चेत् कलहप्रियः अत्याग्रही च। पञ्चमे सुखोपभोक्ता, लग्नात् द्वादशे धनवान् च भवति। ऐवमेव अन्यभावेषु शुक्रस्थितौ तेषु भावेषु स्थितस्य गुरोः समानफलानि फलत्वेन भवति।

**अदृष्टार्थो रोगी मदनवशगोऽत्यन्तमलिनः**
**शिशुत्वे पीडार्त्तः सवितृसुतलग्ने त्वलसवाक्**
**गुरुः स्वर्क्षोच्चस्थे नृपतिसदृशो ग्रामपुरपः**
**सुविद्वाम्श्चार्व्वङ्गो, दिनकरसमोऽन्यत्रकथितः॥**[11]

मेषः, वृषभः, मिथुनम्, कर्काटकम्, सिंहः, कन्या, वृश्चिकेत्यादिषु राशिषु एकः राशिः लग्ने तत्र शनिस्थितौ च नित्यदरिद्रता नित्यरोगः, बाल्ये रोगपीडितः, कामाधीनः, मलिनदेहवस्त्रादियुक्तः च भवति। शेषे पञ्चसु राशिषु एकस्मिन् एकः लग्नः तत्र शनिस्थितौ युद्धत्वं मनोहरशरीरयुक्तः राजतुल्यता इत्यादीनि फलानि लभ्यन्ते। शेषे भावे शनिस्थितौ तत्तस्थाने आदित्यस्य स्थितौ विद्यमानानि समानफलानि भवन्ति।

**निष्कर्षः**

सामाजिकपरिवर्तने मानवस्य महद्योगदानं वर्तते। मानवः समाजमाश्रित्य जीवति। व्यक्तयः एव समाजसृष्टेः प्रधानभूतं कारणम्। व्यक्तिगुणाः एव उत्तमसमाजस्याधारः। मानवजीवने सामाजिक-परिवर्तने च ज्योतिषशास्त्रस्य महद्योगदानं वर्तते इति ज्योतिषज्ञानां अभिप्रायम्। तत्रैव ग्रहाणां स्थितिः चलनाद्यनुगुणं मानवजीवने समाजे च परिवर्तनानि आयान्ति। सर्वेषां ग्रहाणां सामान्यतया शुभाशुभफलानि भवन्ति। तेषां स्थानान्तरानुगुणं फलसिद्धिः भवति। प्रायः केचन ग्रहाः ज्योतिषशास्त्रे शुभग्रहाः तथा च अशुभग्रहाः इत्येवं ज्ञायन्ते। ते च ग्रहाः स्थानानुगुणं फलानि प्रयच्छन्ति। मानवजीवने एते ग्रहाः प्रभावयन्ति। एषः प्रभावः समाजेऽपि प्रतिफलति।

**सहायकग्रन्थसूची**

होराशास्त्रम् (मलयाळ व्यख्यानम्), 2018, कोणत्तुवारियत्त् शङ्करवारियर् , पञ्चाङ्गं पुस्तकशाला, कुन्नंकुळम्

फलदीपिका (मलयाळ व्यख्यानम्), 2008, ब्रह्मश्री चेरुवळि नारायणन् नम्पूतिरि, देवि बुक्स्टाल्, कोटुङ्गलूर्

जातकपारिजातः 2008, श्रीकपिलेश्वरशास्त्रि, वाराणसी

**पाद टिप्पणी**

[1] 27-2 फ.दी
[2] 5-2 बृ.जा
[3] 1-18 बृ.जा
[4] 2-18 बृ.जा
[5] 3-18 बृ.जा
[6] 4-18 बृ.जा
[7] 5-18 बृ.जा
[8] 6-18 बृ.जा
[9] 7-18 बृ.जा
[10] 8-18 बृ.जा
[11] 9-18 बृ.जा